गुरुविप्राद्यभिशापस्य उद्देश्ये । “न नाम यद्दृथं कुर्यात् जनकस्य गुरोस्तथा । भार्य्याया अभिशप्तस्य कृपणस्य विशेषत” इति पुरा० । [२समत्त्वकथिते च ।

**अभिशब्दित** त्रि० आभिमुख्येन शब्दितः । १ सम्यक्समाहूते

**अभिशस्** त्रि० अभि+शन्स–क्विप् । अभिशंसनकर्त्तरि “यदाशंसा निःशसाभिशसा” ऋ० १०,१६४,३ ।

**अभिशस्त** त्रि० अभि+शन्स–क्त । अयं परस्त्रियं गच्छतीत्यादिना मिथ्यावाक्येन मैथुनविषयकदोषारोपो यस्मिन् जने कृतः तस्मिन् । “अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा” या० । “नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्” स्मृतिः । अभि+शस-बधे क्त । २हिंसिते ३आक्रान्ते च त्रि० । “आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः” मनुः । “अभिशस्तामाक्रान्तामिति” प्रा०त० रघु० । उभयतः भावे–क्त ४ आक्रोशे, ५ अपवादकथने ६हिंसने ७ अभिशापे च न० । “एतच्चैव नरश्रेष्ठ रक्ष्या एव द्विजातयः । शापराधानपि हि तान् विषयान्ते समुत्सृजेत् अभिशस्तमपि ह्येषां कृपायीत विशाम्पते” । भा०शा०प० ।

**अभिशस्तक** त्रि० अभिशस्ते अभिशापे भवः कन् । वैद्यकोक्ते अभिशापजज्वरादौ “हन्ता ये देवद्रोहाभिशस्तका अथर्वकृता उपसर्गकृताश्च” सुश्रुतः ।

**अभिशस्ति** स्त्री अभि+शन्स–क्तिन् । १ अभिशापे “उरुष्या णो अभिशस्तेः सोमः” ऋ० १,९१,१५ । अभिशस्तेरभिशापरूपान्निन्दनात्” भा० । २ अपवादे “इमां मिथ्याभिशस्तिञ्च कृष्णस्य समुदाहृताम्” ह० वं० । अभि+शस बधे भावे क्तिन् । ३ हिंसायां “तितिक्षन्ते अभिशस्तिं जनानाम्” ऋ०३,३०,१ । “अभिशस्तिं हिंसाम्” भा० । शस्यते हिंस्यतेऽनेन करणे क्तिन् । ४हिंसाहेतौ, “पुरा तस्या अभिशस्तेरधीहि” ऋ० १,७१,१० “अभिशस्तेः हिंसाहेतोः” भा० । आभिमुख्येन शस्तिर्याचनम् । ५प्रार्थनायाम् । [शार्हे च

**अभिशस्य** त्रि० अभिशस्तिमर्हति यत् । १हिंसार्हे २आक्रो-

**अभि(भी)शाप** पु० अभि+शप–घञ् वा दीर्घः । १ मिथ्यापवादकथने २ आरोपितदोषकथने ३ अनिष्टं ते भूयादित्याक्रोशे च “वेद मिथ्याभिशापास्ते न स्पृशन्ति कदाचन” ह० वं० ।

**अभिशिरोग्र** त्रि० शिरसोऽभिमुखमग्रं यस्य । १ ऊर्द्ध्वमूलाधोग्रे “ओषधे । त्रायस्वैनमिति सप्त दर्भपिञ्जलीर्दक्षिणस्यां कुशुष्णिकायामभिशिरोग्रा उपदनिधाति” गो० । अभिशिरोग्राः ऊर्द्ध्वमूलाधोग्राः सं० त० रघुनन्दनः ।

**अभिशोक** पु० अभिलक्ष्य शोकः । कञ्चिदभिलक्षीकृत्य कृते शोके । शुच–ल्युट् । अभिशोचनमप्यत्र न० ।

**अभिश्रा(श्र)व** पु० अभि+श्रु–अप् वेदे घञ् । अभितः श्रवणे “ऋतं दिवे तदवोचं पृथिव्यामभिश्रावाय” श्रुतिः ।

**अभिश्वैत्य** त्रि० अभितः श्वैत्यं शुद्धचारित्रादस्य । शुद्धचरिते “अदर्शयमयज्वानमभिश्वैत्येति व्याहरन्” भा०द्रो०प० ।

**अभिषङ्ग** पु० अभि+सन्ज–घञ् । १ पराभवे, २ आक्रोशे, ३ शपथे, ४ व्यसने च “अभिषङ्गजडं विजज्ञिवानिति” रघुः “तीव्राभिषङ्गप्रभवेण वृत्तिम्” कुमा० “जाताभिषङ्गो नृपतिर्निषङ्गात्” “ततोऽभिषङ्गानिलविप्रविद्धा” “विनोदयिष्यन्ति नवाभिषङ्गाम्” इति च रघुः “नवाभिषङ्गां नूतनदुःखामिति” मल्लि० । ५आसक्तौ “मुहुरिति वनविभ्रमाभिषङ्गात्” माघः ६भूताद्यावेशे “अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः” माधवनिदानम् ।

**अभिषव** पु० अभि+सु–अप् । १ यज्ञाङ्गस्नाने, २निष्पीडने, ३ सुरोत्पादनादिव्यापारे, ४ सोमलतापाने, ५ तत्कण्डने च “अद्र्यादानप्रभृति त्रिपर्य्यायानभिषवान् करोति” कात्या० १०,१,४ । “निर्यात्य राजानमभिषुण्वन्ति व्याख्यातोऽभिषव” इति कर्क० । “आप्यायनाभिषवाश्वदाभ्येषु च” कात्या० ७,६,२८ । सर्वजित् महाव्रतः संवत्सरदीक्षः सप्ताहाभिषवस्तस्य उपसदः कात्या० “संवत्सरादूर्द्ध्वं सप्ताहेऽतीतेऽभिषवः स्यात्” कर्क० । ६स्नाने । “जपोपवासाभिषवैर्मुनीनाम्” किरा० । करणे अप् । ७ अङ्गुल्यामिति निरु० सोमकण्डनसाधनत्वात् तथात्वम् । आधारे अप् । ८यज्ञे ।

**अभिषवण** न० अभि+सु–ल्युट् । अभिषवशब्दार्थे स्नानमात्रे “शिरसा हरिन्मणिनिभः स वहन् कृतजन्मनोऽभिषवणेन जटाः” किरा० करणे ल्युट् स्त्रियां ङीप् । अभिषवसाधने “स्रुपं पवित्रं तथा ऋजीषाभिषवनीरापः” अथ० ।

**अभिषह्य** त्रि० अभितः सह्यः । १ सोढुं शक्ये । ल्यप् । २प्रसह्येत्यर्थे अव्य० “अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः” । मनुः ।

**अभिषाच्** त्रि० अभि+सच-खि–स्वार्थे णिच्–क्विप् वा । १ आभिमुख्येन सम्बन्धुं समर्थे २ अभिभावुके च “वसो अभिषाचकृष्वान्” ऋ० ६,६३,८ ।

**अभि(भी)षाह्** त्रि० अभि+सह–ण्वि णिच्–क्विप् वा षत्वम् वा दीर्घः । १शत्रुजयिनि २सहनशीले च ।

**अभिषिक्त** त्रि० अभि+सिच–क्त । १ कृताभिषेके राजादौ